अस्य लक्षणं यथा,—

"तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत् प्लुष्टम् ॥

चिकित्सास्य यथा,—

"दग्धस्योपशमार्थाय चिकित्सां संप्रवक्ष्यते ।
प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णन्तथौषधम् ॥
शरीरे स्विन्नभूयिष्ठे स्विन्नं भवति शोणितम् ॥
प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितम् ॥
तस्मात् सुखयति ह्युष्णं नतु शीतं कथञ्चन ॥"
इति सुश्रुते सूत्रस्थाने द्वादशेऽध्याये ॥)

प्लुष, इर् य दाहे । विभागे । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-सक०-सेट् । ) अन्तःस्थतृतीययुक्तः । इर्, अप्लुषत् अप्लोषीत् । य, प्लुष्यति । इति दुर्गादासः ॥

प्लेव, ऋ ङ सेवने । इति कविकल्पद्रुमः । ( भ्वा०-आत्म०-सक०-सेट् । ) अन्तःस्थतृतीययुक्तः । ऋ, अपिप्लेवत् । ङ, प्लेवते । इति दुर्गादासः ॥

प्लोषः, पुं, ( प्लुष दाहे + भावे घञ् । ) दाहः । इत्यमरः । ३ । २ । ६ ॥ (यथा, श्रीकण्ठचरिते । ४ । १७ ।
"दरीषु किन्नरीलोकं धत्ते यः प्लोषविप्लवे ।
न्यासीकृतमनङ्गेन भाण्डागारमिव स्वकम् ॥"
पित्तविकारविशेषः । तद्यथा । "पित्तविकाराश्चत्वारिंशदत ऊर्द्धं व्याख्यास्यन्ते । तद्यथा ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च इत्यादिषु ।" इति चरके सूत्रस्थाने विंशेऽध्याये ।)

प्सा, ल भक्षणे । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-सक०-अनिट् । ) ल, प्साति । इति दुर्गादासः ॥

प्सा, स्त्री, ( प्सा + भावे क्विप् । ) भक्षणम् । इति त्रिकाण्डशेषः ॥

प्सातं, त्रि, ( प्सा + क्तः । ) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥

प्सानं, क्ली, ( प्सा + भावे ल्युट् । ) भोजनम् । इति हेमचन्द्रः । ३ । ८८ ॥

---

## फ

फ, फकारः । द्वाविंशतितमव्यञ्जनवर्णः । (पवर्गस्य द्वितीयवर्णश्च । ) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "उपूपध्मानीयानामोष्ठौ ॥") तस्य तत्त्वं यथा,—

"फकारं शृणु चार्व्वङ्गि ! रक्तविद्युल्लतोपमम् ।
चतुर्व्वर्गप्रदं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे पञ्चमपटलः ॥ * ॥

"वक्रा वामगता रेखा ततोऽधःपङ्गता भवेत् ।
तस्मादूर्द्धगता भूत्वा दक्षमारभ्य कुण्डली ॥
ब्रह्मा रुद्रश्च विष्णुश्च कुण्डली ब्रह्मरूपिणी ।
मात्रा वामाद्दक्षिणतः क्रमशः परिकीर्त्तिता ॥"
इति वर्णोद्धारतन्त्रम् ॥

तत्पर्य्यायः ।
"फकारश्च महेशानि ! शिखी चैव जनार्द्दनः ॥"
इति रुद्रयामलोक्तवर्णाभिधानम् ॥

अस्य ध्यानं यथा,—

"प्रलयाम्बुदवर्णाभां ललज्जिह्वां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ॥
एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य नामानि यथा,—

"फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः ।
जया पादः शिखा रौद्री फेत्कारः शाखिनीप्रियः ॥
उमा विहङ्गमः कालः कुब्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी ॥
फुत्कारो यामिनी व्यक्ता पावनो मोहवर्द्धनः ।
निष्फलवागहङ्कारः प्रयागो ग्रामणीः फलम् ॥"
इति नानातन्त्रशास्त्रम् ॥

( पद्यादौ अस्य प्रयोगेन भयसम्भावना । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"दोधः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

फं, क्ली, ( फक्क असद्व्यवहारे + डः ।) रूक्षोक्तिः । फुत्कृतिः । निष्फलभाषणम् । इति मेदिनी । फे, १ ॥

फः, पुं, यक्षसाधनम् । स्फारम् । झञ्झावातः । इति मेदिनी । फे, १ ॥ वर्द्धकः । जृम्भानिष्कारः । स्फुटः । फललाभः । इति विश्वः ॥ संज्ञाविशेषः । यथा । "हसोऽन्तः फः । हसो विरामश्च फसंज्ञः स्यात् ।" इति मुग्धबोधव्याकरणम् ॥

फक्क, असद्व्यवहारे । शनैर्गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।)कोपधः । फक्कति खलः कुत्सितं व्यवहरतीत्यर्थः । फक्कति वृद्धो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फक्किका, स्त्री, ( फक्क + "धात्वर्थनिर्द्देशे ण्वुल् वक्तव्यः ।" इति वार्त्तिकोक्त्या ण्वुल् । टापि अत इत्वम् । ) असद्व्यवहारः । फाँकि इति भाषा । तत्पर्य्यायः । चोद्यम् २ देश्यम् ३ पूर्ब्बपक्षः ४ । इति शब्दरत्नावली । ( यथा, नैषधे । २ । ६५ ।

"फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥")

न्यायसम्बन्धिव्याख्या । यथा,—

"श्रीमता मथुरानाथतर्कवागीशधीमता ।
विषदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किकाः ॥"
इत्यनुमानखण्डटीकारम्भे मथुरानाथः ॥

फञ्जिका, स्त्री, ( भनक्ति रोगानिति । भञ्ज आमर्द्दने + ण्वुल् । पृषोदरादित्वात् भस्य फः । टापि अत इत्वम् । ) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८६ ॥ ( यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे हृच्चूडामणिरसे ।
"निर्गुण्डी फञ्जिका वासा रविमूलत्रिकण्टकैः ॥"
"फञ्जिका ब्राह्मणयष्टिका ।" इति तट्टीका ॥) देवताड़ः । दुरालभा । इति शब्दचन्द्रिका ॥

फञ्जिपत्रिका, स्त्री, ( भनक्ति रोगानिति भञ्जि । पृषोदरादित्वात् भस्य फः । फञ्जि रोगहारकं पत्रं यस्याः । कप् । टाप् । अत इत्वम् । ) आखुपर्णी । इति रत्नमाला ॥ ( विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)

फञ्जी, स्त्री, ( भनक्ति रोगानिति । भञ्ज + अच् । पृषोदरादित्वात् भस्य फः । गौरादित्वात् ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥ ( यथा, वैद्यकचक्रपाणौ श्वासाधिकारे ।
"अमृता नागरफञ्जीव्याघ्रीपर्णासमाधितः क्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ निहन्त्याशु ॥"
तथाचास्या गुणाः हारीते प्रथमस्थाने दशमेऽध्याये ।
"वत्सादनी तथा फञ्जी तैलपर्णी तु सिंहिका ।
चक्रमर्द्दक इत्यन्ये दुर्ज्जरा वातकोपनाः ॥")

फट्, व्य, अनुकरणशब्दः । अस्त्रबीजम् । यथा । फड़स्त्रं शस्त्रमायुधम् । इति बीजवर्णाभिधानम् ॥ * ॥ शान्तिकुम्भचालने अर्घ्यपात्रचालने अर्घ्यजलेन पूजोपकरणाभ्युक्षणे अन्तरीक्षगविघ्नोत्सारणे विकिरक्षेपणे गन्धपुष्पाभ्यां करशोधने अघमर्षणे पापपुरुषताड़ने कराङ्गन्यासे नैवेद्यप्रोक्षणे होमाग्नेः क्रव्यादांशत्यागे होमाग्न्यावाहने तदग्निप्रोक्षणादौ च फड़िति-मन्त्रस्य प्रयोगः ॥ ( यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फड़न्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥"
विशीर्णादौ, त्रि । यथा, वाजसनेयसंहितायाम् । ७ । ३ । "देवांश्शो यस्मै त्वेड़े तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ फट् ॥"
"असौ द्वेष्यो हतो निहतः सन् फट् विशीर्णो भवतु छिन्नो विशरणे अस्य क्विबन्तस्यैतद्रूपम् । फलतीति फट् डलयोरैक्यम् । स्वाहाकारस्थाने फड़ित्यभिचारे प्रयुज्यते ।" इति तद्भाष्ये वेददीपे महीधरः ॥ )

फटः, पुं स्त्री, (स्फुट विकसने + पचाद्यच् । पृषोदरादित्वात् साधुः ) फणा । इत्यमरजटाधरौ ॥

फटा, स्त्री, ( फट + स्त्रियां टाप् । ) फणा । ( यथा, पञ्चतन्त्रे । १ । ८३ ।
"निर्व्विषेणापि सर्पेण कर्त्तव्या महती फटा ।
विषं भवति मा वास्तु फटाटोपो भयङ्करः ॥")
दम्भः । इति मेदिनी । टे, १३ ॥ कितवः । इति हेमचन्द्रः ॥ * ॥
"स्यात् पवर्गद्वितीयादि फटायाञ्च स्फटापि च ॥"
इतिभरतधृतशब्दभेदः ॥

फड़िङ्गा, स्त्री, (फड़िति शब्दं इङ्गति गच्छतीति । इङ्ग गतौ + अच् । टाप् । ) झिल्लिका । इति शब्दचन्द्रिका ॥ फड़िङ्ग इति भाषा ॥

फण, ण निःस्नेहे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सेट् । ) फेणतुः पफणतुः । निःस्नेहः अनायासेनोत्पत्तिः । फणति वाञ्छितं श्रीमताम् । अनायासेन जातम् । अस्यैव आत्मस्य